**केंदीय विद्यालय संगठन , तिनसुकिया संभाग** **QP10SKT02PB24**

**(पूर्व- परिषदीय- परीक्षा 2024-25)**

**कक्षा – दशमी**

**विषयः- संस्कृतम् (कोड – 122)**

**समयः – होरात्रयम्** **पूर्णांकाः – 80**

**सामान्यनिर्देशाः –**

1. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 8 पृष्ठानि मुद्रितानि सन्ति ।**
2. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।**
3. **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**
   - **'क' खण्डः : अपठितावबोधनम् 10 अङ्काः**
   - **'ख' खण्डः : रचनात्मककार्यम् 15 अङ्काः**
   - **'ग' खण्डः : अनुप्रयुक्तव्याकरणम् 25 अङ्काः**
   - **'घ' खण्डः : पठितावबोधनम् 30 अङ्काः**
4. **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
5. **उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः**
6. **प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।**
7. **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**

| | **खण्डः – क अपठितावबोधनम् (10 अङ्काः)** | |
|---|---|---|
| 1. | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत ।**<br>भारतद्वारं प्रसिद्ध-स्मारकं वर्तते। वीराणां बलिदानस्य पुण्यस्मृतिस्थलम् इदम्। अस्मिन् वारे वीराणां नामानि उत्कीर्णानि सन्ति। इदम् ऐतिहासिकस्थलं दृष्ट्वा जनाः नतमस्तकाः भवन्ति। भारतद्वारं परितः हरिताः वृक्षाः शोभन्ते। देश-विदेशेभ्यः आगताः जनाः भारतद्वारं द्रष्टुम् आगच्छन्ति। एतत् द्वारं सर्वान् आकर्षयन्ति । विस्तृताः स्वच्छाः मार्गाः, हरिताः वृक्षाः अस्य शोभां वर्धन्ते। भारतद्वारस्य पार्श्वे 'बोटक्लब' इति पर्यटनस्थलम् अस्ति। अवकाशदिवसे तु जनाः परिवारेण सह अत्र आगच्छन्ति। अत्रागत्य सहभोजनं कुर्वन्ति। रात्रौ विद्युद्दीपकानां प्रकाशैः प्रकाशितं भारतद्वारम् दूरात् एव सुशोभते । गणतन्त्रदिवसे स्वतन्त्रतादिवसे च जनाः अत्रागत्य दिवङ्गतसैनिकान् स्मरन्ति तेभ्यः श्रद्धाञ्जलिं च यच्छन्ति। भारतद्वारं भारतस्य गौरवम् अस्ति। | **1x2=2** |
| | **क. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) भारतद्वारं परितः के शोभन्ते?<br>(ii) भारतस्य गौरवं किम्?<br>(iii) भारतद्वारस्य पार्श्वे किम् अस्ति ? | **2x2=4** |
| | **ख पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) भारतद्वारस्य शोभां के के वर्धयन्ति?<br>(ii) कैः प्रकाशितं भारतद्वारं दूरादेव शोभते?<br>(iii) अस्य शोभां के वर्धन्ते ?? | **1** |
| | **(ग) अस्य गद्यांशस्य उचित-शीर्षकं लिखत।** | |
| | **(घ) विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** | **1x3=3** |
| | (i) 'स्मरन्ति' इति क्रियापदस्य कर्तृपदं किम्?<br>(क) वीराः<br>(ख) जनाः | |

| | | | |
|---|---|---|---|
| | (ग) पर्यटका:<br>(घ) सर्वे<br>**(ii) 'प्रकाशितम्' इति पदं कस्य विशेषणपदम् अस्ति?**<br>(क) स्मारकस्य<br>(ख) बलिदानस्य<br>(ग) भारतद्वारस्य<br>(घ) भारतस्य<br>**(iii) 'निशायाम्' इत्यर्थे अत्र कीं पदं प्रयुक्तम्?**<br>(क) प्रकाशे<br>(ख) दिवसे<br>(ग) द्वारे<br>(घ) रात्रौ<br>**(iv) 'इदम् ऐतिहासिक-स्थलं दृष्ट्वा जनाः नतमस्तकाः भवन्ति' इति वाक्ये 'इदम्' सर्वनामपदं कस्मै प्रयुक्तम्?**<br>(क) स्मारकाय<br>(ख) स्थलाय<br>(ग) भारतद्वाराय<br>(घ) द्वाराय | |

| | | |
|---|---|---|
| | **खण्डः – ख**<br>**रचनात्मककार्यम् (15 अङ्काः)** | |
| **2.** | **अतिविश्वासात् हानिः इत्यधिकृत्य मित्राय मञ्जूषायाः सहायतया पत्रं लिखत।**<br>परीक्षाभवनतः<br>दिनांङ्कः- x x x<br>प्रिय मित्र !<br>नमो नमः<br>अत्र अहं कुशलं तत्र (i)................ \| भवता (ii)......................यत् प्रथमसत्रपरीक्षायां मम प्रथमसत्रपरीक्षायां परीक्षापरिणामः कीदृशः अस्ति? प्रथमसत्रपरीक्षायां मम (iii).......................आशानुकूलः न अस्ति\| अस्य.(iv)..............अपि मया ज्ञातम्, मम स्वोपरि..(v).............एव आसीत् यत् अहं तु सर्वम् एव जानामि\| कदाचित्.(vi)............. स्वोपरि विश्वासः मनवाय विनाशकारी भवति\| अस्य दुष्परिणामः (vii)................तु सोढः परं कोऽपि (viii)..................अस्य पात्रं न भवेत् इति कृत्वा कथयामि\| कदापि स्वोपरि अतिविश्वासः नकरणीयः\| शेषं (ix)................कुशलम्\| सर्वेभ्यः मम (x)------------------- \|<br>भवतःमित्रम्<br>मञ्जूषा<br>कारणम्, परीक्षापरिणामः, अस्तु, , ईदृशः, अन्यः, प्रणामाः, अतिविश्वासः, मया, सर्वम् , पृष्टम्, | **1/2x10=5** |

| | | |
|---|---|---|
| **3.** | **अधोदत्तं चित्रं दृष्ट्वा प्रदत्तशब्दानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत।**<br><br><br>**मञ्जूषा**<br>संगणकयन्त्राणि, जनाः, दर्शयति, उपविशन्ति, कक्षे, कुर्वन्ति, प्रशिक्षकः, चित्रम्, पश्यन्ति, ध्यानमग्नाः, सहायतया, प्रयुज्यन्ते, उपयोगः, उपकरणेन, यन्त्रसञ्चालने<br>**अथवा**<br>मञ्जूषायां प्रदत्तशब्दानां सहायतया 'कल्पलतेव विद्या' इति विषयम् अधिकृत्य संस्कृतेन पञ्च वाक्यानि लिखत ।<br>**मञ्जूषा**<br>विद्या, सर्वमेव, उत्थानम्, चक्षुः, सम्मानम्, सुखम्, निर्णयम्, कर्तुम्, धनम्, कीर्तिम्, विन्दति, किं किं–साधयति | **1x5=5** |
| **4.** | **अधोलिखित-वाक्यानि संस्कृत भाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्)**<br>i. उसने संस्कृत पुस्तक पढ़ी।<br>ii. मेरे घर के पास विद्यालय है।<br>iii. बसंत सभी ऋतुओं में श्रेष्ठ है।<br>iv. बच्चों तुम सब उधर मत जाओ।<br>v. छात्र कक्षा में भोजन नहीं करेंगे।<br>vi. शिवाजी शक्तिमान राजा थे।<br>vii. भारतीय संस्कृति विश्व में प्रसिद्ध है। | **1x5=5** |

| | | |
|---|---|---|
| | **खण्डः – ग**<br>**अनुप्रयुक्त-व्याकरणम् (25 अङ्काः)** | |
| **5.** | **अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं संधिच्छेदं वा कुरुत – (केवलं प्रश्न चतुष्टयम्)**<br><br>i. अस्य पिता किं **<u>तपः + तेपे</u>**।<br>ii. मम नृत्यं तु **<u>प्रकृतेराराधना</u>**।<br>iii. नय माम् **<u>अस्मात्+नगरात्</u>** बहुदूरम।<br>iv. **<u>अन्योऽपि</u>** बुद्धिमाँल्लोके मुच्यते महतो भयात्।<br>v. भूरी परिश्रम्य **<u>किंचित्+वित्तम्</u>** उपार्जितवान। | **1x4=4** |

| | | |
|---|---|---|
| 6. | **अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा कृत्वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।**<br>(i) भगवन् अयं तु **<u>विगतः प्राणः यस्मात् सः एव</u>।**<br>(क) विगतप्राणः<br>(ख) विगतप्राणात्<br>(ग) विगतप्राणम्<br>(घ) विगतप्राणी<br><br>(ii) इदं कथनं तु **<u>अश्रुतम्</u>** अस्ति।<br>(क) अश्रुक्ति<br>(ख) न श्रुतम्<br>(ग) अति श्रुतम्<br>(घ) अश्रुभिः युक्तम्<br><br>(iii) वने **<u>पशुपक्षिणः</u>** निवसन्ति।<br>(क) पशवः पक्षिणः<br>(ख) पशवः च पक्षिणः च<br>(ग) पशुञ्च पक्षी च<br>(घ) पशु पक्षिणश्च<br><br>(iv) **<u>कुशलवौ</u>** रामम् प्रणमतः।<br>(क) कुशः च लवः च<br>(ख) कुशम् लव च<br>(ग) कुशः लवौ च<br>(घ) कुशौ च लवौ च | **1x4=4** |
| 7 | **अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत (केवलं प्रश्नचतुष्टयम्)**<br><br>(i) अन्योऽपि **<u>बुद्धिमान्</u>** लोके मुच्यते ?<br>(क) बुद्धि + मतुप्<br>(ख) बुद्धि + टाप्<br>(ग) बुद्धि + डीप्<br>(ख) बुद्धि + टाप्<br>(ii) पुत्रस्य **<u>अभ्यधिका</u>** कृपा ।<br>(क) अभ्यधिक + ठक्<br>(ख) अभ्यधिक + टाप्<br>(ग) अभ्यधिक + ङीप्<br>(घ) अभ्यधिक + तल्<br>(iii) त्वं मीनान् छलेन अधिगृह्य **<u>क्रूर+तल</u>** भक्षयसि ।<br>(क) क्रूरतायै<br>(ख) क्रूरतायाः<br>(ग) क्रूरतया<br>(घ) क्रूरतानाम्<br>(iv) तदेवाहुः महात्मानः **<u>सम + त्व</u>** इति तथ्यतः ।<br>(क) समत्वम् | **1x4=4** |

| | | |
|---|---|---|
| | (ख) समता<br>(ग) समताम्<br>(घ) समतया<br>(v) सा **<u>तपस्विनी</u>**। स्वापत्यम् एवम् निर्भर्त्सयति ।<br>(क) तपस्वी + ठक्<br>(ख) तपस्वी + तल्<br>(ग) तपस्वी + इन्<br>(घ) तपस्विन् + ङीप् | |
| **8.** | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत - (केवलं प्रश्नत्रयम्)**<br>(i) भोः वासव ! पुत्रस्य दैन्यं दृष्ट्वा मया......?<br>(क) रुद्ये (ख) रुद्यते<br>(ग) रुद्यसे (घ) रोदिमि<br>(ii) .... दीन**म्** इति जानन्नपि सः कृषकः पीडयति ।<br>(क) तम् (ख) तेन<br>(ग) सः (घ) ताः<br>(iii) किम् एतत् भवता न ...........?<br>(क) दृश्ये (ख) दृश्यसे<br>(ग) दृश्यते (घ) पश्यति<br>(iv)...... पुत्राय बाल्ये महत् विद्याधनं यच्छति ।<br>(क) पिता (ख) पित्रा<br>(ग) पितरम् (घ) पितरः | **1x3=3** |
| **9.** | **अधोलिखितवाक्येषु अंकानां स्थाने समयसूचकसंस्कृतसंख्यापदानि लिखत।**<br>(i) मम विद्यालयः प्रातः .................... (7.30) वादने आरभते \|<br>(ii) ................ (7.45) वादने प्रार्थनासभा भवति।<br>(iii) ............. (8.00) वादने उपस्थिति-विषयक-कार्य भवति।<br>(iv)........... (8.15) वादने अध्यापनकार्यम् आरभते। | **1x4=4** |
| **10**. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्)**<br>(i) ................आस्ते सा धूर्ता तत्र गम्यताम् ।<br>(ii) अरे परभृत्! अहं ................. तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः?<br>(iii) तत्तनयः.................. एव छात्रावासे अध्ययने संलग्नः समभूत् ।<br>(iv) त्वं कारादण्डं लप्स्यसे इति प्रोच्य ..........................अहसत् आरक्षी ।<br>**मञ्जूषा-**<br>उच्चैः, यदि, तत्र, यत्र | **1x3=3** |
| **11.** | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (केवलं प्रश्नत्रयम्)**<br>(i) <u>मार्गं</u> गहनकानने सा एकं व्याघ्रं ददर्श ?<br>(क) मार्गः (ख) मार्गे (ग) मार्गात् (घ) मार्गाय<br>(ii) सः ह्यः पदातिरेव <u>चलिष्यति</u> ।<br>(क) अचलत् (ख) अचलः (ग) चलतु (घ) चलेत्<br>(iii) किं सा <u>कुपितः</u> एवं भणति? | **1x3=3** |

| | | |
|---|---|---|
| | (क) कुपितौ (ख) कुपिता (ग) कुपिताः (घ) कुपिते<br>(iv) सर्वे प्रकृतिमातरं <u>प्रणमति</u> ।<br>(क) प्रणमतः (ख) प्रणमथः (ग) प्रणमावः (घ) प्रणमन्ति | |

| खण्डः – घ पठितावबोधनम् (30 अङ्काः) | | |
|---|---|---|
| **12.** | **अधोलिओखित गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच 'रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वे वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चित् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ ।<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) अभियुक्तः कया क्रन्दति स्म?<br>(ख आरक्षी कीदृशः आसीत्?<br>(ग) कीदृशं देहं वहन्तौ तौ प्रस्थिती?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(क) मुदितः आरक्षी अभियुक्तं किम् उवाच?<br>(ख) उभौ शवे कुत्र स्थापितवन्तौ ?<br>(ग) कीदृशस्य शवस्य वहनं दुष्करम् आसीत्?<br>**इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) 'दुःखी' इत्यस्य किं विपर्ययपदम् अत्र प्रयुक्तम् ?<br>(ख) 'मृतशरीरस्य' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।<br>(ग) 'प्राचलताम्' क्रियापदस्य कर्तृपदं लिखत । | **1/2x2=1**<br><br>**1x2=2**<br><br>**1x2=2** |
| **13.** | **अधोलिखितं पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।<br>तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥<br>त्यक्त्वा धर्मप्रदां वाचे परुषां योऽभ्युदीरयेत् ।<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) चित्ते वाचि कथम् भवेत्?<br>(ख) कः परुषां वाचं वदति?<br>(ग) तदेव समत्वम् इति के आहुः?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(क) कः अपक्वं फलं भुङ्क्ते?<br>(ख) समत्वं किं भवति?<br>(ग) वाचि कीदृशी अवक्रता भवेत् ?<br>**इ. निर्देशानुसारम् उत्तरत (केवलं प्रश्नद्वयम्)**<br>(क) 'आहुः' इति क्रियापदस्य कर्तृपदं किम्?<br>(ख) 'वक्रता' इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत ।<br>(ग) 'मनसि' इति पदस्य पर्यायपदं श्लोकात् चित्वा लिखत । | **1/2x2=1**<br><br>**1x2=-2**<br><br>**1x2=-2** |
| **14.** | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –<br>(सिंहासनस्थः रामः । ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ) | |

| | | |
|---|---|---|
| | विदूषकः - इत इत आर्यौ!<br>कुशलवी (रामम् उपसृत्य प्रणम्य च) अपि कुशले महाराजस्य?<br>रामः - युष्मद्दर्शनात् कुशलमिव । भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः ।<br>(आसनार्धमुपवेशयति)<br>उभौ - राजासनं खल्वेतत्, न युक्तमध्यासितुम् ।<br>रामः सव्यवधानं न चारित्रलोपाय। तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम् ।<br>(अङ्कमुपवेशयति)<br>उभौ - (अनिच्छां नाटयतः) राजन् ! अलमतिदाक्षिण्येन ।<br>रामः - अलमतिशालीनतया ।<br>भवति शिशुजनो वयोऽनुरोधाद् गुणमहतामपि लालनीय एव।<br>व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम् ॥<br>रामः - एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता?<br>लवः - भगवन् सहस्रदीधितिः ।<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) कुशलवयोः मार्गं कः निर्दिशति?<br>(ख) कौ अनिच्छां नाटयतः?<br>(ग) कुशलवयोः वंशस्य कर्ता कः?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(क) रामः कथं वंशपरिचयं पृच्छति?<br>(ख) कुशलवौ रामम् उपसृत्य प्रणम्य च किं पृच्छतः?<br>(ग) हिमकरः कस्मात् भावात् पशुपतेः मस्तके व्रजति ?<br>**इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) 'निर्गच्छतः' इति पदस्य विपर्ययपदं नाट्यांशात् चित्वा लिखत ।<br>(ख) 'ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ।' अत्र कर्तृपदं किम्?<br>(ग) 'समीपं गत्वा' इत्यस्य पर्यायपदं किं प्रयुक्तम्? | <br><br><br><br><br><br><br><br><br><br><br><br><br><br>**½x2=1**<br><br><br><br><br>**1x2=2**<br><br><br><br>**1x2=2** |
| **15**. | **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं प्रश्नचतुष्टयम्)**<br>(क) हिमकरः **<u>बालभावात्</u>** पशुपतेः मस्तके व्रजति ।<br>(ख) गजः **<u>वन्यपशून्</u>** तुदन्तं शुण्डेन पोथयित्वा मारयति ।<br>(ग) चौरस्य **<u>पादध्वनिना</u>** अतिथिः प्रबुद्धः ।<br>(घ) आरक्षी चौर्याभियोगे तं **<u>न्यायालयं</u>** नीतवान् ।<br>(ङ) दुर्वहमत्र जीवितं जातं **<u>प्रकृतिः</u>** एव शरणम् । | **1x4=4** |
| **16**. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>तोयैरल्पैरपि करुणया भीमभानौ निदाघे<br>मालाकार ! व्यरचि भवता या तरोरस्य पुष्टिः ।<br>सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां<br>धारासारानपि विकिरता विश्वतो वारिदेन ॥<br>**अन्वयः** हे मालाकार! (i).................... निदाघे अल्पैः तोयैः अपि (ii)........................ करुणया अस्य तरोः या पुष्टिः व्यरचि। वाराम् (iii)................... विश्वतः धारासारान् अपि विकिरता वारिदेन इह (iv)............ ...... सा (पुष्टिः) किम् शक्या।<br>**मञ्जूषा** - भवता, भीमभानी, जनयितुम्, प्रावृषेण्येन ।<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –** | **1x4=4** |

| | | |
|---|---|---|
| | सम्पत्तौ च विपत्तौ च महतामेकरूपता।<br>उदये सविता रक्तो रक्तश्चास्तमये तथा ॥<br>**भावार्थः**- अस्य श्लोकस्य भावः अस्ति यत् यथा (1)................. उदये समये रक्तः भवति, सः सूर्यः (ii).....................समये अपि रक्तः भवति, तथैव महान्तः सज्जनाः सम्पत्तौ (iii)............................. सति अपि शान्ताः भवन्ति एवमेव विपत्ती आगते अपि ते (iv).................. तिष्ठन्ति विचलिताः न भवन्ति।<br>**मञ्जूषा -** अस्ते, सूर्यः, शान्ताः, आगते। | |
| **17.** | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत –**<br>(क) व्याघ्रोऽपि सहसा नष्टः गलबद्धश्रृगालकः ।<br>(ख) जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम् ?<br>(ग) परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच ।<br>(घ) श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती ।<br>(ङ) अतएव उच्यते-बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।<br>(च) यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् ।<br>(छ) सः व्याघ्रः तथा कृत्वा काननं ययौ।<br>(ज) एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत् । | **1/2x8=4** |
| **18.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत (केवलं प्रश्नत्रयम्)**<br>(i) विद्वांसः लोकेस्मिन् <u>**चक्षुष्मन्तः**</u> प्रकीर्तिताः ।<br>(क) नेत्रवन्तः (ख) धनवन्तः (ग) ज्ञानवन्तः (घ) विद्यावन्तः<br>(ii) सा पुत्रौ चपेटया प्रहत्य <u>**जगाद**</u> ।<br>(क) गदति (ख) अरोदित् (ग) उक्तवती (घ) अहसत्<br>(iii) वायुमण्डलं <u>**भृशं**</u> दुषितम् ।<br>(क) दूरम् (ख) अत्यधिकम् (ग) न्यूनम् (घ) किञ्चित्<br>(iv) पाषाणी सभ्यता <u>**निसर्गे**</u> समाविष्टा न स्यात् ।<br>(क) निस्सरणम् (ख) धरायाम् (ग) स्वर्गे (घ) प्रकृत्याम् | **1x3=3** |

**************